छत्रचामरधारिण्यौ स्त्रियौ पार्श्वे तु कारयेत् ।
सिंहासनगतं वापि गन्धर्व्वगणसंयुतम् ॥
इन्द्राणीं वामतस्तस्य कुर्य्यादुत्पलधारिणीम् ॥

सूत उवाच ।

प्रभाकरस्य प्रतिमामिदानीं शृणुत द्विजाः ।
रथस्थं कारयेद्देवं पद्महस्तं सुलोचनम् ॥
सप्ताश्वञ्चैकचक्रञ्च रथन्तस्य प्रकल्पयेत् ।
मुकुटेन विचित्रेण पद्मगर्भसमप्रभम् ॥
नानाभरणभूषाढ्यं भुजाभ्यां धृतपुष्करम् ।
स्कन्धस्थे पुष्करे ते तु लीलयैव धृते सदा ॥
चोलकच्छन्नवपुषं क्वचिच्चित्रेषु दर्शयेत् ।
वस्त्रयुग्मसमोपेतं चरणौ तेजसावृतौ ॥
प्रतीहारौ च कर्त्तव्यौ पार्श्वयोर्दण्डपिङ्गलौ ।
कर्त्तव्यौ खड्गहस्तौ च पार्श्वयोः पुरुषावुभौ ॥
लेखनीकृतहस्तञ्च पार्श्वे धातारमव्ययम् ।
नानादेवगणैर्युक्तमेवं कुर्य्याद्दिवाकरम् ॥
अरुणः सारथिस्तस्य पद्मिनीपत्रसन्निभः ।
अश्वौ च वलिसुग्रीवावन्तस्थौ तस्य पार्श्वयोः ॥
भुजङ्गरश्मिभिर्बद्धाः सप्ताश्वा रश्मिसंयुताः ।
पद्मस्थं वा हयस्थं वा पद्महस्तं प्रकल्पयेत् ॥*॥
अग्नेस्तु लक्षणं वक्ष्ये सर्व्वकामफलप्रदम् ।
दीप्तं सुवर्णवपुषमर्द्धचन्द्रासनस्थितम् ॥
बालार्कसदृशन्तस्य वसनञ्चापि दर्शयेत् ।
यज्ञोपवीतिनं देवं लम्बकूर्चधरन्तथा ॥
कमण्डलुं वामकरे दक्षिणे त्वक्षसूत्रकम् ।
ज्वालावितानसंयुक्तमजवाहनमुज्ज्वलम् ।
कुण्डस्थञ्चापि कुर्व्वीत मूर्द्ध्नि सप्तशिखान्वितम् ॥*
तथा यमं प्रवक्ष्यामि दण्डपाशधरं विभुम् ।
महामहिषमारूढं कृष्णाञ्जनचयोपमम् ॥
सिंहासनगतञ्चापि दीप्ताग्निसमलोचनम् ।
महिषं चित्रगुप्तञ्च करालान् किङ्करांस्तथा ॥
समन्ताद्दर्शयेत्तस्य सौम्यासौम्यांस्तथा सुरान् ॥
राक्षसेन्द्रं तथा वक्ष्ये लोकपालञ्च नैरृतम् ।
नरारूढं महाकायं रक्षोभिर्बहुभिर्वृतम् ॥
खड्गहस्तं महानीलं कज्जलाचलसन्निभम् ।
नरयुक्तविमानस्थं पीताम्बरविभूषितम् ॥ * ॥
वरुणञ्च प्रवक्ष्यामि पाशहस्तं महाबलम् ।
शुद्धस्फटिकवर्णाभं हारकेयूरसंवृतम् ॥
मृगाधिरूढं वरदं पताकाध्वजसंयुतम् ।
भूषणावगतं शान्तं किरीटवरधारिणम् ॥ * ॥
वायुरूपं प्रवक्ष्यामि धूम्रञ्च मृगवाहनम् ।
चित्राम्बरधरं शान्तं युवानं कुञ्चितभ्रुवम् ।
मृगाधिरूढं वरदं पताकाध्वजसंयुतम् ॥ * ॥
कुवेरञ्च प्रवक्ष्यामि कुण्डलाभ्यामलङ्कृतम् ।
हारकेयूररचितं सिताम्बरधरं सदा ॥
गदाधरञ्च कर्त्तव्यं वरदं मुकुटान्वितम् ।
नरयुक्तविमानस्थं मेषस्थं वापि कारयेत् ॥
वर्णेन पीतवर्णेन गुह्यकैः परिवारितम् ।
महोदरं महाकायं ग्रहाष्टकसमन्वितम् ॥
गुह्यकैर्बहुभिर्युक्तं धनव्यग्रकरैस्तथा ॥ * ॥
तथैवेशं प्रवक्ष्यामि धवलं धवलेक्षणम् ।
त्रिशूलपाणिनं देवं त्र्यक्षं वृषगतं विभुम् ॥ * ॥

मातृणां लक्षणं वक्ष्ये यथावदनुपूर्व्वशः ।
ब्रह्माणी ब्रह्मसदृशी चतुर्वक्त्रा चतुर्भुजा ।
हंसाधिरूढा कर्त्तव्या साक्षसूत्रकमण्डलुः ॥*॥
महेश्वरस्य रूपेण तथा माहेश्वरी मता ।
जटामुकुटसंयुक्ता वृषस्था चन्द्रशेखरा ।
कपालशूलखट्वाङ्गवरदाथ चतुर्भुजा ॥ * ॥
कुमाररूपा कौमारी मयूरवरवाहना ।
रक्तवस्त्रधरा तद्वच्छूलशक्तिधरा तथा ॥
हारकेयूरसम्पन्ना कृकवाकुधरा तथा ॥ * ॥
वैष्णवी विष्णुसदृशी गरुत्मति समास्थिता ।
चतुर्बाहुश्च वरदा शङ्खचक्रगदाधरा ।
सिंहासनगता वापि बालकेन समन्विता ॥ * ॥
वाराहीञ्च प्रवक्ष्यामि महिषोपरिसंस्थिताम् ।
वराहसदृशीं देवीं घण्टाचामरधारिणीम् ।
गदाचक्रधरान्तद्वद्दानवेन्द्रविनाशिनीम् ॥ * ॥
इन्द्राणीमिन्द्रसदृशीं वज्रशूलगदाधराम् ।
गजासनगतान्देवीं लोचनैर्बहुभिर्वृताम् ।
तप्तकाञ्चनवर्णाभां सर्व्वाभरणभूषिताम् ॥ * ॥
तीक्ष्णखड्गधरान्तद्वद्वक्ष्ये योगीश्वरीमिमाम् ।
दीर्घजिह्वामूर्द्ध्वकेशीमस्थिखण्डैश्च मण्डिताम् ।
दंष्ट्राकरालवदनां कुर्य्याच्चैव कृशोदरीम् ॥ * ॥
कपालमालिनीं देवीं मुण्डमालाविभूषिताम् ।
कपालं वामहस्ते तु मांसशोणितपूरितम् ॥
सकेशन्तु शिरो न्यस्य शक्तिका दक्षिणे तथा ।
गृध्रस्था वायसस्था वा निर्म्मांसा विगतोदरी ।
करालवदना तद्वत् कर्त्तव्या सा त्रिलोचना ॥*॥
चामुण्डा बद्धघण्टा च द्वीपिचर्म्मधरा शिवा ।
दिग्वासा कालिका तद्वद्रासभस्था कपालिनी ॥
सुरक्तपुष्पाभरणा वर्द्धनी ध्वजसंयुता ।
विनायकञ्च कुर्व्वीत मातृणामन्तिके सदा ॥
वीरेश्वरश्च भगवान् वृषारूढो जटाधरः ।
वीणाहस्तस्त्रिशूली च मातृणामग्रतो भवेत् ॥*॥
श्रियन्देवीं प्रवक्ष्यामि नवे वयसि संस्थिताम् ।
सुयौवनां पीनगण्डां रक्तोष्ठीं कुञ्चितभ्रुवम् ॥
पीनोन्नतस्तनतटां मणिकुण्डलधारिणीम् ।
सुमण्डलं मुखं तस्याः शिरः सीमन्तभूषितम् ॥
पद्मस्वस्तिकशङ्खैर्वा भूषितां कुन्तलालकैः ।
कञ्चुकाबद्धगात्रौ च हारभूषौ पयोधरौ ॥
नागहस्तोपमौ बाहू केयूरकटकोज्ज्वलौ ।
पद्मं हस्ते च दातव्यं श्रीफलं दक्षिणे करे ॥
मेखलाभरणान्तद्वत्तप्तकाञ्चनसुप्रभाम् ।
नानाभरणसम्पन्नां शोभनाम्बरधारिणीम् ।
पार्श्वे तस्याः स्त्रियः कार्य्याश्चामरव्यग्रपाणयः
पद्मासनोपविष्टान्तु पद्मसिंहासनस्थिताम् ॥
करिभ्यां स्नाप्यमाना सा भृङ्गाराभ्यामनेकशः ।
प्रतिपालयन्तौ करिणौ भृङ्गाराभ्यां तथापरौ ॥
स्तूयमाना च लोकेशैस्तथा गन्धर्व्वगुह्यकैः ॥*॥
तथैव यक्षिणी कार्य्या सिद्धासुरनिषेविता ।
पार्श्वयोः कलशौ तस्यास्तोरणे देवदानवाः ॥
नागाश्चैव तु कर्त्तव्याः खड्गखेटकधारिणः ।
अधस्तात्प्रकृतिस्तेषां नाभेरूर्द्ध्वञ्च पौरुषी ॥
फणाश्च मूर्द्ध्नि कर्त्तव्या द्विजिह्वा बहवः समाः ।

पिशाचा राक्षसाश्चैव भूतवेतालजातयः ॥
निर्म्मांसाश्चैव ते सर्व्वे रौद्रा विकृतरूपिणः ।
क्षेत्रपालश्च कर्त्तव्यो जटिलो विकृताननः ॥
दिग्वासा जटिलस्तद्वत् श्वगोमायुनिषेवितः ।
कपालं वामहस्ते तु शिरः केशसमावृतम् ।
दक्षिणे शक्तिकां दद्यादसुरक्षयकारिणीम् ॥*॥
अथातः संप्रवक्ष्यामि द्विभुजं कुसुमायुधम् ।
पार्श्वे चाश्वमुखं तस्य मकरध्वजसंयुतम् ॥
दक्षिणे पुष्पबाणञ्च वामे पुष्पमयं धनुः ।
प्रीतिः स्याद्दक्षिणे तस्य भोजनोपस्करान्विता ॥
रतिस्तु वामपार्श्वे च शयनोपस्करान्विता ।
पटश्च पटहश्चैव खरः कामातुरस्तथा ॥
पार्श्वतो जलवापी च वनं नन्दनमेव च ।
सुशोभनश्च कर्त्तव्यो भगवान् कुसुमायुधः ॥
संस्थानमीदृक्तं स्याद्विस्तरं विश्वनेत्रकम् ।
एतदुद्देशतः प्रोक्तं प्रतिमालक्षणं मया ॥
विस्तरेण न शक्नोति वृहस्पतिरपि द्विजाः ॥”

इति मत्स्यपुराणे देवार्च्चानुकीर्त्तने प्रतिमा-लक्षणं नाम २३२ । २३३ । २३४ । २३५ अध्यायाः ॥ * ॥ सा द्विविधा । स्थापनरूपा स्वयं व्यक्तरूपा च । यथा,—

श्रीसदाशिव उवाच ।

“शृणु देवि ! प्रवक्ष्यामि तदंशावसथं हरेः ।
स्थापनञ्च स्वयं व्यक्तं द्विविधं तत् प्रकीर्त्तितम् ॥
शिलामृद्दारुलौहाद्यैः कृत्वा प्रतिकृतिं हरेः ।
श्रौतस्मार्त्तागमैः प्रोक्ता क्रियासंस्थापना हि तत् ॥
तत्स्थापनमिति प्रोक्तं स्वयं व्यक्तं हि मे शृणु ।
यस्मिंस्तु निहितो विष्णुः स्वयमेव नृणां भुवि ॥
पाषाणदार्व्वोरात्मेशः स्वयं व्यक्तं हि तत् स्मृतम् ।
स्वयं व्यक्ते स्थापने वा पूजयेन्मधुसूदनम् ॥
देवतानां महर्षीणामर्च्चनार्थं सनातनः ।
स्वयमेव जगन्नाथः सान्निध्यं याति केशवः ॥
यस्य यद्विग्रहे भाग्यं तदेवाविरभूद्भुवि ।
तदेव पूजयेन्नित्यन्तस्मिन्नेव रमेत् सदा ॥
श्रियोऽङ्गशायी देवेशो विधेरर्च्चाः शुभानने ! ।
स एवेक्ष्वाकुनाथानां तपसाविरभूद्भुवि ॥
मयापि काश्यां संपूज्यो माधवः कलुषापहः ।
दक्षिणोदधितीरे तु नीलाद्रौ पुरुषोत्तमे ॥
दारुरूपी जगन्नाथो ब्रह्मणा स्थापितः स्वयम् ।
स एव पूज्यः सर्व्वेषां लोकानां खलु पार्व्वति ! ॥
नरनारायणः साक्षात् पूज्यो बदरिकाश्रमे ।
गदाधरो गयायान्तु प्रयागे माधवस्तथा ॥
माधवो विधिवत् पूज्यो गङ्गासागरसङ्गमे ।
कपालमोचने तीर्थे कलिङ्गेऽर्च्यो हरिस्तथा ॥
विष्णुश्च बहिरङ्गे तु भीममूर्त्तिः शिवे यतः ।
द्वारकायां वासुदेवः कुरुक्षेत्रे रणेश्वरः ॥
नारायणो चकूटाद्रौ पूज्यो नित्यं सनातनः ।
स्वयं श्रीभगवान् कृष्णो धाम्नि वृन्दावने शुभे ॥
गोविन्दः केशवो नन्दयशोदानन्दनो विभुः ।
पूज्यो मदनगोपालगोवर्द्धनधरादिकः ।
चतुरशीतिके क्रोशे ब्रह्माण्डातीतके शिवे ! ।